# Tryambakeshvara Shiva Prarthana by Gautama

# ગૌતમકૃતા ત્ર્યમ્બકેશ્વરશિવપ્રાર્થના

## Document Information

Text title : Tryambakeshvara Shiva Prarthana by Gautama and Godavaryutpatti and Ahalya Pavana Kathanam

File name : tryambakeshvarashivaprArthanAtathAgodAvaryutpattyevaMahalyApAvanakathanamgautamakRRitA.i

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 21||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Tryambakeshvara Shiva Prarthana by Gautama

# ગૌતમકૃતા ત્ર્યમ્બકેશ્વરશિવપ્રાર્થના

Tryambakeshvara Shiva Prarthana by Gautama and Godavaryutpatti and Ahalya Pavana Kathanam

ગૌતમકૃતા ત્ર્યમ્બકેશ્વરશિવપ્રાર્થના તથા ગોદાવર્યુત્પત્ત્યેવમહલ્યાપાવનકથનમ્

ગૌતમઃ -

ત્વદ્ભક્તિપાવિતસ્યાદ્ય સ્નાતુમમ્ભો મહેશ્વર ।
પ્રદેહિ પાવનં પુણ્યં લોકાનામઘનુત્તયે ॥ ૫૨॥

ભગીરથાર્થં દેવેશ પૂતા ગઙ્ગા (દત્તા ગઙ્ગત) ત્વયા ધૃતા
સાગરાશ્ચ તદમ્ભોભિઃ પ્લાવિતાસ્તે દિવઙ્ગતાઃ ॥ ૫૩॥

મત્પાવનાર્થં વિશ્વેશ દેહિ પુણ્યાં નદીં શિવામ્ ।
લોકાનામપિ દેવેશ પાપતાપવિનાશિનીમ્ ॥ ૫૪॥

—

ઈશ્વરઃ -

શિવે ગૌતમવાક્યેન તત્સ્તુત્યા ચાપિ હર્ષિતઃ ।
નિસૃષ્ટા મજ્જટામૂલાન્મમ પર્વતરૂપિણઃ ॥ ૫૫॥

સા પપાત મહીપૃષ્ઠે તરઙ્ગાવલિભાસુરા ।
મત્સ્યકર્કટનક્રાદ્યૈઃ પ્લાવયન્તી તટદ્વયમ્ ॥ ૫૬॥

ત્રિયમ્બકોત્તમાઙ્ગેન નિર્જગામાથ સાગરમ્ ।
તત્ર બ્રહ્માદયો દેવા ગન્ધર્વોરગકિન્નરાઃ ॥ ૫૭॥

વિદ્યાધરપ્સરોમુખ્યા નારદાદ્યા મુનીશ્વરાઃ ।
વૈહાયસેન માર્ગેણ સમાજગ્મુસ્તદામ્બિકે ॥ ૫૮॥

દૃષ્ટ્વા તદાશ્ચર્યકરં ગોદાવર્યુદ્ભવં તદા ।
ત્રિયમ્બકો મહાલિઙ્ગજટાજૂટતરઙ્ગિતામ્ ॥ ૫૯॥

ગોદાવરીં તદા સર્વે દૃષ્ટ્વા નત્વા મહેશ્વરમ્ ।
સ્નાત્વા તસ્યાં ગૌતમેન સિહસંસ્થે બૃહસ્પતૌ ॥ ૬૦॥

સમુદ્ધૂલ્ય તદાઙ્ગાનિ ત્રિપુણ્ડ્રાવલિભાસુરા ।
ત્રિયમ્બકેશ્વરં દેવાઃ સમ્પૂજ્યાથ પ્રણમ્ય ચ ॥ ૬૧॥

બિલ્વપત્રૈઃ સમભ્યર્ચ્ય રુદ્રસૂક્તસ્તદા સુરાઃ ।
જહુઃ સ્વપાપજં તાપં વૃદ્ધગઙ્ગાજલાપ્લવાત્ ॥ ૬૨॥

શિવલિઙ્ગોત્તમાઙ્ગોત્થપૂતનદ્યુદ્ભવૈર્જલૈઃ ।
સ્નાત્વા સ ગૌતમો વિપ્રસ્તદાઽભૂન્મુક્તકિલ્બિષઃ ॥ ૬૩॥

શિલારૂપાપિ તસ્પત્ની અહલ્યા શાપિતા શિવે ।
ગોદાવરીતરઙ્ગોત્થશીકરૈર્ધૂતકિલ્બિષા ॥ ૬૪॥

માસુરં સ્વં તદા રૂપં પ્રાપાશ્ચર્યકરં શિવે ।
પત્ન્યા સમન્વિતો દેવિ ગૌતમં માં તદાઽસ્તુવત્ ॥ ૬૫॥

—

ગૌતમઃ -

ત્રિયમ્બકં ત્વા સુભગં સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
યજામિ સતતં દેવિ મૃત્યુભીતોઽહમીશ્વર ॥ ૬૬॥

મહેશ્વર મહાદેવ ચન્દ્રચૂડ મહેશ્વર ।
નમસ્તે પાર્વતીકાન્ત પ્રપન્નં પાહિ માં સદા ॥ ૬૭॥

વિશ્વાધિક મહેશાન વૃષભધ્વજ શઙ્કર ।
નમસ્તે રુદ્ર દેવેશ બાહુભ્યાં તે નમો નમઃ ॥ ૬૮॥

ધન્વને તે નમસ્તુભ્યં જગતાં પતયે નમઃ ।
પત્તીનાં પતયે તુભ્યમન્નાનાં પતયે નમઃ ॥ ૬૯॥

બભ્લુશાય નમસ્તુભ્યં નમસ્તે કૃત્તિવાસસે ।
નમ ઉગ્રાય ભીમાય નમઃ સોમાય શમ્ભવે ॥ ૭૦॥

નમસ્તે સહમાનાય અષાળ્હાય નમો નમઃ ।
નમઃ શિવાય શાન્તાય નમઃ શિવતરાય ચ ॥ ૭૧॥

ગિરીશાય નમસ્તુભ્યં ત્ર્યમ્બકાય નમો નમઃ ॥ ૭૨॥

દ્રાપિન્હિરણ્મય શરીર હિરણ્યબાહો

ત્વામન્ધસાં પતિરિતિ પ્રવદન્તિ વેદાઃ ।
દારિદ્ર્યં મમ દુષ્કૃતં ચ ભગવન્ સદ્યો વિનશ્યાધુના
સમ્પૂર્ણં ધનધાન્યગોગણશતૈસ્તૂર્ણં ગૃહં મે કુરુ ॥ ૭૩॥

યો માં ન નન્દસ્વભિમાનગર્વાન્નિભિન્દત્યનિન્દ્યં તવ પાદસેવિનમ્ ।
યોઽસ્માનહો દ્વેષ્ટિ ચ યં ચ દ્વિષ્મઃ તં રુદ્ર જમ્ભે વિદધામિ શમ્ભો ॥ ૭૪॥

વાજાદિપ્રથિતં મહાફલગણં ત્વત્પાદુકારાધકં
પ્રાપ્યં દેવ દયાનિધે ચમકજાપારાર્થસંસૂચિતમ્ ।
ભક્તિઃ શામ્ભવપુઙ્ગવૈસ્તવ સદા સગ્ધિઃ સપીતિશ્ચ મે
અક્ષુચ્ચૈવાસ્તુ મહેશ તેઽદ્ય કૃપયા નૈવેદ્યસમ્ભોજને ॥ ૭૫॥

—

ઈશ્વરઃ -

ઇત્થં સ્તુત્વા ગૌતમોઽપિ માં પ્રણમ્યામ્બિકે તદા ।
પ્રાહ માં દેવ પૂતોઽસ્મિ ધન્યોઽસ્મીતિ મુહુર્મુહુઃ ॥

તલ્લિઙ્ગમૌલિસઙ્ગૈકપૂતયા વૃદ્ધગઙ્ગયા ॥ ૭૬॥

દર્શનાદખિલપાપનાશકં સ્પર્શનાદખિલકામદં શુભમ્ ।
પ્રાશનાચ્ચ નિજબોધદાયકં ચન્દ્રચૂડચરણોદકં ભજે ॥ ૭૭॥

ઇતિ સ્તુત્વા પ્રહૃષ્ટાત્મા ત્ર્યમ્બકે શિખરે મુનિઃ ।
તત્રોવાસ મહાદેવ્ય હલ્યયા ચ સમન્વિતઃ ॥ ૭૮॥

સૂતઃ -

ઇત્થં ત્ર્યમ્બકભૂધરોરુશિખરાત્ તુઙ્ગૈસ્તરઙ્ગૈર્યુતા
ગઙ્ગા વૃદ્ધતમા શિવાદ્ય શિરસો ભૂતા જગત્પાવની ।
સા સર્વાન્સુરસત્તમાનથ મુદા શૈવં મુનિં ગૌતમં
પુષ્ણન્તીત્યઘસઙ્ઘભઞ્જનકરી ગઙ્ગેવ ગોદાવરી ॥ ૭૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ગૌતમકૃતા ત્ર્યમ્બકેશ્વરશિવપ્રાર્થના તથા ગોદાવર્યુત્પત્ત્યેવમહલ્યાપાવનકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૧॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 21..

Notes:

Rishi Gautam worships Tryambakeshwara Shiva at Tryambaka Giri. Shiva releases Godavari (aka Vriddh Ganga) from His dreadlocks. Ahalya is relieved of her curse.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

*Tryambakeshvara Shiva Prarthana by Gautama*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*